Clarity of buddhi (बुद्धेः स्वच्छता)

वुध्-धातोः क्तिन् प्रत्यये च बुद्धिः। आत्माश्रितार्थप्रकाशः, उपलब्धिः, ज्ञानं, चैतन्यं चेति अस्याः पर्यायशब्दाः। निश्चयात्मिका अन्तःकरणवृत्तिः एषा। अस्याः बुद्धेः त्रिविधाः भेदाः वर्तन्ते। ते यथा – सात्त्विक-बुद्धिः, राजसिक-बुद्धिः, तामसिकबुद्धिश्च। तदधुना आलोच्यते।

प्रवृत्तिश्च निवृत्तिश्च कार्याकार्ये भयाभये।

बन्धं मोक्षश्च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी।। (गी.१८।३०)

अन्वयः - पार्थ! प्रवृत्तिश्च निवृत्तिश्च कार्याकार्ये भयाभये वन्धं मोक्षश्च या वेत्ति सा सात्त्विकी बुद्धिः।

বঙ্গানুবাদ – হে পার্থ! প্রবৃত্তি-নিবৃত্তি, কার্য-অকার্য, ভয়-অভয়, বন্ধ-মোক্ষ প্রভৃতি বিপরীত পদার্থ সকলকে ও তাদের থেকে উৎপন্ন ফলসমূহকে যে বুদ্ধি জানতে সক্ষম হয় সেই বুদ্ধি কেই সাত্বিকবুদ্ধি বলে।

व्याख्या – तत्र ज्ञानं बुद्धेः वृत्तिः, बुद्धिः तु वृत्तिमती। बुद्धेः फलं दृष्ट्वा वयं तस्याः स्वरूपं जानीमः। अर्जुनमुद्दिश्य श्रीकृष्णः आदौ सात्तिकबुद्धेः स्वरूपम् आह। तद्यथा सात्त्विकबुद्धेः स्वरूपं भवति सा प्रवृत्तिमूलका। विषये बन्धनस्य हेतुः कर्ममार्गः वा प्रवृत्तिः। पुनश्च सा निवृत्तिमूलका अपि। निवृत्तिः मोक्षहेतुः वासनाक्षयहेतुः वा। सात्त्विकबुद्धिः कार्य-अकार्यबोधका। अर्थात् कः करणीयः कश्च अकरणीयः तस्मिन् विषयप्रतिपादिका। सात्त्विकबुद्धिमाध्यमेन हि वयं भयं अनुभवामः पुनश्च अभमपि अनुभवामः। जीवस्य बन्धमोक्षयोः हेतुभूता इयं सात्तिकबुद्धिः। अतः परस्पर-विपरीतविषयज्ञानानि अवगन्तुं शक्ता समर्था वा या बुद्धिः सा खलु सात्त्विकी वुद्धिः।

यया धर्ममधर्मं च कार्यं चाकार्यमेव च।

अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी।। (गी.१८।३१)

अन्वयः - पार्थ! यया धर्मम् अधर्मम् च कार्यम् च अकार्यम् एव च अयथावत्[1] प्रजानाति सा राजसी बुद्धिः।

বঙ্গানুবাদ – হে পার্থ! যে বুদ্ধির দ্বারা ধর্ম ও অধর্মকে, কার্য ও অকার্যকে যথাযথ ভাবে জানতে পারা যায় না সেই বুদ্ধিকেই রাজসীবুদ্ধি বলে।

व्याख्या – अतःपरं श्रीकृष्णेण अर्जुनाय राजसिकबुद्धेः स्वरूपं उक्तम्। यया बुद्ध्या शास्त्रादिष्टं धर्मम्, अधर्मं, कर्त्तव्यम्, अकर्त्तव्यं च वयं यथायथरूपेण न जानीमः सा बुद्धिः राजसी भवति।

अधर्मं धर्ममिति या मन्यते तमसावृता।

सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी।। (गी.१८।३२)

अन्वयः - पार्थ! या बुद्धिः अधर्मम् धर्मम् इति, सर्वार्थान् विपरीताम् च मन्यते तमसावृता सा तामसी।

বঙ্গানুবাদ - হে পার্থ! যে বুদ্ধি অধর্মকে ধর্ম এবং সকল জ্ঞেয় বিষয়কে বিপরীত মনে করে, তমগুণের দ্বারা আচ্ছাদিত সেই বুদ্ধিকে তামসী বুদ্ধি বলে।

व्याख्या – यत् किञ्चित् अधर्मम् निषद्धं वा तत् धर्मम् विहितम् इति या बुद्धिः अस्माकं स्मारयति, पुनश्च अकरणीयम् अकर्तव्यं यत्, तत् करणीयमिति या बुद्धिः स्मारयति सा तामसी बुद्धिः इति। तमःगुणप्रभावेन सा बुद्धिः समग्रज्ञेयविषयान् सदा विपरीतविषये विजानाति। अतः श्रीकृष्णः वदति एवं यस्याः बुद्धेः स्वरूपा सा तामसी इति।

To be continued...

---

[1] न यथावत् इति अयथावत्